आदित्य स्तोत्रं

आदित्य स्तोत्रं

विस्तारायाममानं दशभिरुपगतो योजनानां सहस्रै-
-श्चक्रे पंचारनाभित्रितयवति लसन्नेमिषट्के निविष्टः |
सप्तश्छंदस्तुरंगाहितवहनधुरो हायनांशत्रिवर्गः
व्यक्ताक्लुप्ताखिलांगः स्फुरतु मम पुरः स्यंदनश्चंडभानोः || 1 ||

आदित्यैरप्सरोभिर्मुनिभिरहिवरैर्ग्रामणीयातुधानैः
गंधर्वैर्वालखिल्यैः परिवृतदशमांशस्य कृत्स्नं रथस्य |
मध्यं व्याप्याधितिष्ठन् मणिरिव नभसो मंडलश्चंडरश्मेः
ब्रह्मज्योतिर्विवर्तः श्रुतिनिकरघनीभावरूपः समिंधे || 2 ||

निर्गच्छंतोऽर्कबिंबान्निखिलजनिभृतां हार्दनाडीप्रविष्टाः
नाड्यो वस्वादिबृंदारकगणमधुनस्तस्य नानादिगुत्थाः |
वर्षंतस्तोयमुष्णं तुहिनमपि जलान्यापिबंतः समंतात्
पित्रादीनां स्वधौषध्यमृतरसकृतो भांति कांतिप्ररोहाः || 3 ||

श्रेष्ठास्तेषां सहस्रे त्रिदिववसुधयोः पंचदिग्व्याप्तिभाजां
शुभ्रांशुं तारकौघं शशितनयमुखान् पंच चोद्भासयंतः |
आरोगो भ्राजमुख्यास्त्रिभुवनदहने सप्तसूर्या भवंतः
सर्वान् व्याधीन् सुषुम्नाप्रभृतय इह मे सूर्यपादाः क्षिपंतु || 4 ||

आदित्यानाश्रिताः षण्णवतिगुणसहस्रान्विता रश्मयोऽन्ये
मासे मासे विभक्तास्त्रिभुवनभवनं पावयंतः स्फुरंति |
येषां भुव्यप्रचारे जगदवनकृतां सप्तरश्म्युत्थितानां
संसर्पे चाधिमासे व्रतयजनमुखाः सत्क्रियाः न क्रियंते || 5 ||

आदित्यं मंडलांतःस्फुरदरुणवपुस्तेजसा व्याप्तविश्वं
प्रातर्मध्याह्नसायं समयविभजनादृग्यजुः सामसेव्यं |
प्राप्यं च प्रापकं च प्रथितमतिपथिज्ञानिनामुत्तरस्मिन्
साक्षाद्ब्रह्मेत्युपास्यं सकलभयहराभ्युद्गमं संश्रयामि || 6 ||

यच्छक्त्याऽधिष्ठितानां तपनहिमजलोत्सर्जनादिर्जगत्या-
-मादित्यानामशेषः प्रभवति नियतः स्वस्वमासाधिकारः |
यत् प्राधान्यं व्यनक्ति स्वयमपि भगवान् द्वादशस्तेषु भूत्वा
तं त्रैलोक्यस्य मूलं प्रणमत परमं दैवतं सप्तसप्तिं || 7 ||

स्वःस्त्रीगंधर्वयक्षा मुनिवरभुजगा यातुधानाश्च नित्यं
नृत्तैर्गीतैरभीशुग्रहनुतिवहनैरग्रतः सेवया च |
यस्य प्रीतिं वितन्वंत्यमितपरिकरा द्वादश द्वादशैते
हृद्याभिर्वालखिल्याः सरणिभणितिभिस्तं भजे लोकबंधुं || 8 ||

ब्रह्मांडे यस्य जन्मोदितमुषसि परब्रह्ममुख्यात्मजस्य
ध्येयं रूपं शिरोदोश्चरणपदजुषा व्याहृतीनां त्रयेण |
तत्सत्यं ब्रह्म पश्याम्यहरहमभिधं नित्यमादित्यरूपं
भूतानां भूनभः स्वः प्रभृतिषु वसतां प्राणसूक्ष्मांशमेकं || 9 ||

आदित्ये लोकचक्षुष्यवहितमनसां योगिनां दृश्यमंतः
स्वच्छस्वर्णाभमूर्तिं विदलितनलिनोदारदृश्याक्षियुग्मं |
ऋक्सामोद्गानगेष्णं निरतिशयलसल्लोककामेशभावं
सर्वावद्योदितत्वादुदितसमुदितं ब्रह्म शंभुं प्रपद्ये || 10 ||

ओमित्युद्गीथभक्तेरवयवपदवीं प्राप्तवत्यक्षरेऽस्मिन्
यस्योपास्तिः समस्तं दुरितमपनयत्वर्कबिंबे स्थितस्य |
यत्पूजैकप्रधानान्यघमखिलमपि घ्नंति कृच्छ्रव्रतानि
ध्यातः सर्वोपतापान् हरतु परशिवः सोऽयमाद्यो भिषङ्नः || 11 ||

आदित्ये मंडलार्चिः पुरुषविभिदयाद्यंतमध्यागमात्म-
-न्यागोपालांगनाभ्यो नयनपथजुषा ज्योतिषा दीप्यमानं |
गायत्रीमंत्रसेव्यं निखिलजनधियां प्रेरकं विश्वरूपं |
नीलग्रीवं त्रिनेत्रं शिवमनिशमुमावल्लभं संश्रयामि || 12 ||

अभ्राकल्पः शतांगः स्थिरफणितिमयं मंडलं रश्मिभेदाः
साहस्रास्तेषु सप्त श्रुतिभिरभिहिताः किंचिदूनाश्च लक्षाः |
एकैकेषां चतस्रस्तदनु दिनमणेरादिदेवस्य तिस्रः
क्लुप्ताः तत्तत्प्रभावप्रकटनमहिताः स्रग्धरा द्वादशैताः || 13 ||

दुःस्वप्नं दुर्निमित्तं दुरितमखिलमप्यामयानप्यसाध्यान्
दोषान् दुःस्थानसंस्थग्रहगणजनितान् दुष्टभूतान् ग्रहादीन् |
निर्धूनोति स्थिरां च श्रियमिह लभते मुक्तिमभ्येति चांते
संकीर्त्य स्तोत्ररत्नं सकृदपि मनुजः प्रत्यहं पत्युरह्नां || 14 ||

इति श्रीमदप्पय्यदीक्षित विरचितं महामहिमान्वित श्री आदित्य स्तोत्ररत्नं |